ति ह स्माह महिदास ऐतरेयः प्रेत्येंद्रो भूत्वैषु लोकेषु राजति तदाऊर्यदनेन रूपेणामुं लोक
मभिसंभवती३ अथ केन रूपेणेमं लोकमाभवती३ तद्यदेतत्स्त्रियां लोहितं भवत्यग्ने
स्तद्रूपं तस्मात्तस्मान्न बीभत्सेताथ यदेतत्पुरुषे रेतो भवत्यादित्यस्य तद्रूपं तस्मात्तस्मान्न बी

भक्त्यैतेन सोयमात्मेममात्मानममुष्मा आत्मने संप्रयच्छति स वा अमुष्मा आत्मानमिममस्मा आत्मने संप्रय
च्छति तावन्योन्यमभिसंभवतोनेनाह रूपेणामुं लोकमभिसंभवत्यमुनो रूपेणेमं लोकमाभवति॥
॥११॥ तत्रैते श्लोकाः॥ यदक्षरं पंचविधं समेति युजो युक्ता अभि यत्संवहंति॥ सत्यस्य सत्यमनु यत्र
युज्यते तत्र देवाः सर्व एकं भवंति॥ यदक्षरादक्षरमेति युक्तं युजो युक्ता अभि यत्संवहंति॥ सत्यस्य स
त्यमनु यत्र युज्यते तत्र देवाः सर्व एकं भवंति॥ यद्वाचओभितियच्च नेति यच्चास्याः क्रूरं यदुचोल्बणिष्ठु॥
तद्यूयाकवयो अन्वविंद.. न्नामायत्तासमत्यन्दुतेधि॥ यस्मिन्नामा समतप्यन्दुतेधि तत्र देवाः
सर्वे युजो भवंति॥ तेन पाप्मानमपहत्य ब्रह्मणा स्वर्गं लोकमप्येति विद्वान्॥ नैनं वाचा स्त्रियं ब्रुवन्नैनम
स्त्री पुमान् ब्रुवन्॥ पुमांसं न ब्रुवन्नेनं वदन्वदति कश्चन॥ अः इति ब्रह्म तत्रागतमहमिति तद्वा इदं बृ
हती सहस्रं संपन्नं तस्य वा एतस्य बृहती सहस्रस्य संपन्नस्य षट्त्रिंशतमक्षराणां सहस्राणि
भवंति तावंति पुरुषायुषोह्नां सहस्राणि भवंति जीवाक्षरेणैव जीवाहराप्नोति जीवाह्ना जीवाक्ष
रमित्यनु कामं मारोथ देवरथस्तस्य वागुद्धिः श्रोत्रे पक्षसी चक्षुषी युक्ते मनः संग्रहीता तदयं प्राणो

घितिष्ठति लदुक्तमृषिणा तेन यातं मूनसो जवीयसा निमिषश्चिज्जवीयसेति ॥२०॥ ॥
इत्यष्टमोध्यायः ॥ ॥आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्स ईक्षत लोकान्नु सृजा
इति स इमांल्लोकानसृजत अंभो मरीचीर्मरमापोदोंभः परेण दिवं द्यौः प्रतिष्ठान्तरिक्षं मरीचयः
पृथिवी मरो या अधस्तात्ता आपः स ईक्षतेमे नु लोका लोकपालान्नु सृजा इति सोद्भ्य एव पुरुषं
समुद्धृत्यामूर्छयत्तमभ्यतपत्तस्याभितप्तस्य मुखं निरभिद्यत यथांडं मुखाद्वाग्वाचोग्निर्नासि
के निरभिद्येतां नासिकाभ्यां प्राणः प्राणाद्वायुरक्षिणी निरभिद्येतामक्षीभ्यां चक्षुश्चक्षुष आदि
त्यः कर्णौ निरभिद्येतां कर्णाभ्यां श्रोत्रं श्रोत्राद्दिशस्त्वङ्निरभिद्यत त्वचो लोमानि लोमभ्य ओषधि
वनस्पतयो हृदयं निरभिद्यत हृदयान्मनो मनसश्चंद्रमा नाभिर्निरभिद्यत नाभ्या अपानो पाना
न्मृत्युः शिश्नं निरभिद्यत शिश्नाद्रेतो रेतस आपः ॥२१॥ ता एता देवताः सृष्टा अस्मिन्महत्य
र्णवे प्रापतंस्तमशनापिपासाभ्यामन्ववार्जत्ता एनमब्रुवन्नायतनं नः प्रजानीहि यस्मिन्प्रति
ष्ठिता अन्नमदामेति ताभ्यो गामानयत्ता अब्रुवन्न वै नोयमलमिति ताभ्यो श्वमानयत्ता अ

ब्रुवन्न वै नोयमलमिति ताभ्यः पुरुषमानयत्ता अब्रुवन्सुकृतं बतेति पुरुषो वाव सुकृतं ता अब्रवीद्य
थायतनं प्रविशतेत्यग्निर्वाग्भूत्वा मुखं प्राविशद्वायुः प्राणो भूत्वा नासिके प्राविशदादित्यश्चक्षुर्भूत्वा
क्षिणी प्राविशद्दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्नोषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशंश्चन्द्रमा
मनो भूत्वा हृदयं प्राविशन्मृत्युरपानो भूत्वा नाभिं प्राविशदापो रेतो भूत्वा शिश्नं प्राविशंस्तमशना
पिपासे अब्रूतामावाभ्यामभिप्रजानीहीति ते अब्रवीदेतास्वेव वां देवतास्वाभजाम्येतासु भागिन्यौ
करोमीति तस्माद्यस्यै कस्यै च देवतायै हविर्गृह्यते भागिन्यावेवास्यामशनापिपासे भवतः॥२२॥ स
ईक्षतेमे नु लोकाश्च लोकपालाश्चान्नमेभ्यः सृजा इति सोपोभ्यतपत्ताभ्योभितप्ताभ्यो मूर्तिरजायत
या वै सा मूर्तिरजायतान्नं वै तत्तदेनत्सृष्टं पराङ्त्यजिघांसत्तद्वाचाजिघृक्षत्तन्नाशक्नोद्वाचा ग्रही
तुं स यद्धैनद्वाचाग्रहैष्यदभिव्याहृत्य हैवान्नमत्रप्स्यत्तत्प्राणेनाजिघृक्षत्तन्नाशक्नोत्प्राणेन ग्रहीतुं स य
द्धैनत्प्राणेनाग्रहैष्यदभिप्राण्य हैवान्नमत्रप्स्यत्तच्चक्षुषाजिघृक्षत्तन्नाशक्नोच्चक्षुषा ग्रहीतुं स य
द्धैनच्चक्षुषाग्रहैष्यद्दृष्ट्वा हैवान्नमत्रप्स्यत्तच्छ्रोत्रेणाजिघृक्षत्तन्नाशक्नोच्छ्रोत्रेण ग्रहीतुं स यद्धै

नच्छ्रोत्रेणाग्रहैष्यच्छ्रुत्वा हैवान्नमत्रप्स्यत्तत्त्वचाजिघृक्षत्तन्नाशक्नोत्त्वचाग्रहीतुं स यद्धैनत्त्वचाग्रहैष्य
त्स्पृष्ट्वा हैवान्नमत्रप्स्यत्तन्मनसाजिघृक्षत्तन्नाशक्नोन्मनसाग्रहीतुं स यद्धैनन्मनसाग्रहै
ष्यद्ध्यात्वा हैवान्नमत्रप्स्यत्तच्छिश्नेनाजिघृक्षत्तन्नाशक्नोच्छिश्नेनाग्रहीतुं स यद्धैनच्छिश्नेनाग्रहैष्य
द्विसृज्य हैवान्नमत्रप्स्यत्तदपानेनाजिघृक्षत्तदावयत्सैषोन्नस्य ग्रहो यद्वायुरन्नायुर्वा एष य
द्वायुः स ईक्षत कथन्न्विदं मदृते स्यादिति स ईक्षत कतरेण प्रपद्या इति स ईक्षत यदि वाचाभिव्या
हृतं यदि प्राणेनाभिप्राणितं यदि चक्षुषा दृष्टं यदि श्रोत्रेण श्रुतं यदि त्वचा स्पृष्टं यदि मनसा ध्या
तं यद्यपानेनाभ्यपानितं यदि शिश्नेन विसृष्टमथ कोहमिति स एतमेव सीमानं विदार्यैतया द्वा
रा प्रापद्यत सैषा विदृतिर्नाम द्वास्तदेतन्नान्दनं तस्य त्रय आवसथास्त्रयः स्वप्ना अयमावसथो
यमावसथोयमावसथ इति स जातो भूतान्यभिव्यैख्यत्किमिहान्यं वावदिषदिति स एतमेव पु
रुषं ब्रह्म ततममपश्यदिदमदर्शमिती३ँ॥ तस्मादिदन्द्रो नामेदन्द्रो ह वै नाम तमिदन्द्रं सन्तमिन्द्र
इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः परोक्षप्रिया इव हि देवाः ॥२३॥ ॥इति नव०ध्यायः॥

अपक्रामतगर्भिण्यः॥पुरुषेहवाअयमादितोगर्भोभवतियदेतद्रेतस्तदेतत्सर्वेभ्योंगेभ्यस्तेजःसंभूत
मात्मन्येवात्मानंबिभर्त्तितद्यदास्त्रियांसिंचत्यथैनज्जनयतितदस्यप्रथमंजन्मतत्स्त्रियाआत्मभूयं
गच्छतियथास्वमंगंतथातस्मादेनांनहिनस्तिसास्यैतमात्मानमत्रगतंभावयतिसाभावयित्री
भावयितव्याभवतितंस्त्रीगर्भंबिभर्तिसोग्रएवकुमारंजन्मनोग्रेधिभावयतिसयत्कुमारंजन्मनो
ग्रेधिभावयत्यात्मानमेवतद्भावयत्येषांलोकानांसंतत्याएवंसंतताहीमेलोकास्तदस्यद्वितीयंज
न्मसोस्यायमात्मापुण्येभ्यःकर्मभ्यःप्रतिधीयतेथास्यायमितरआत्माकृतकृत्योवयोगतःप्रैतिस
इतःप्रयन्नेवपुनर्जायतेतदस्यतृतीयंजन्मतदुक्तमृषिणागर्भेनुसन्नन्वेषामवेदमहंदेवानांजनि
मानिविश्वा॥शतंमापुरआयसीररक्षन्नधश्श्येनोजवसानिरदीयमितिगर्भएवैतच्छयानोवामदेवएव
मुवाचसएवंविद्वानस्माच्छरीरभेदादूर्ध्वउत्क्रम्यामुष्मिन्स्वर्गेलोकेसर्वान्कामानाप्त्वामृतःस
मभवत्समभवत्॥२४॥यथास्थानंगर्भिण्यः॥ ॥इतिद्वितीयोध्यायः॥कोयमात्मेतिवयमुपास्महे
कतरःसआत्मायेनवापश्यतियेनवाशृणोतियेनवागंधानाजिघ्रतियेनवावाचंव्याकरोतियेनवास्वादु

चोस्त्वाउत्व विज्ञानाति दियदेतद्धृदयं मनश्चैतत्संज्ञानमाज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः
संकल्पः क्रतुरसुः कामो वश इति सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्त्येष ब्रह्मैष इंद्र एष प्र
जापतिरेते सर्वे देवा इमानि च पंच महाभूतानि पृथिवी वायुराकाश आपो ज्योतींषीत्येतानीमानि च क्षुद्र
मिश्राणीव बीजानीतराणि चेतराणि चाण्डजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि चाश्वा गावः
पुरुषा हस्तिनो यत्किंचेदं प्राणि जंगमं च पतत्रि च यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्र
ज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म स एतेन प्रज्ञेनात्मनास्माल्लोकादुत्क्रम्यामुष्मिन्स्वर्गे लो
के सर्वान्कामानाप्त्वामृतः समभवत्समभवत् ॥२५॥ ॥इत्येकादशोध्यायः॥ ॥वाङ्मे मनसि प्रतिष्ठि
ता मनो मे वाचि प्रतिष्ठितमाविराविर्म एधि। वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीरनेनाधीतेना
होरात्रान्संदधाम्यृतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवत्ववतु मामवतु वक्तारम
वतु वक्तारं॥ इति द्वादशोध्यायः॥२६॥ ॥इति द्वितीयारण्यकं समाप्तं॥श्री॥ ॥श्रीविश्वेश्वरार्पणमस्तु॥
ओं॥अथातः संहिताया उपनिषत्पृथिवी पूर्वरूपं द्यौरुत्तररूपं वायुः संहितेति माण्डूकेय आकाशः
संहितेत्यस्य माक्षव्यो वेदयांचक्रे स हाविपरिहतो मेने न मे स्य पुत्रेण समगादिति समानेवेतत्स्यादि

२३ हतो मेन इत्यागस्त्यः समानं ह्येतद्भवति वायुश्चाकाशश्चेत्यधिदैवतमथाध्यात्मं वाक्पूर्वरूपं मन उत्तर
रूपं प्राणः संहितेति भूरवीरो मांडूकेयोथ ह्यास्य पुत्र आह ज्येष्ठो मनः पूर्वरूपं वागुत्तररूपं मन सा
वा अग्रे संकल्पयत्यथ वाचा व्याहरेति तस्मान्मन एव पूर्वरूपं वागुत्तररूपं प्राणस्त्वेव संहितेति स
मानमेनयोरत्र पितुश्च पुत्रस्य च स एषोश्वरथः प्राष्टिवाहनो मनो वाक्प्राण संहितः स य एवमेतां सं
23 हितां वेद संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेतीति नु मांडूके
यानां ॥१॥ अथ शाकल्यस्य पृथिवी पूर्वरूपं द्यौरुत्तररूपं वृष्टिः संधिः पर्जन्यः संधातेति तदुताप्यिय
त्रैतद्बलवदनूछ्रकन्त्सदधदहोरात्रे वर्षतीति द्यावापृथिव्यौ समधातामित्यकताप्याकुशितान्याधि
दैवतमथाध्यात्मं पुरुषो ह वा अयं सर्व आंदं ह्यबिलेदं भवत इत्याउस्तस्येदमेव पृथिव्या रूपमि
दं दिवस्तत्रायमंतरेणाकाशो यथासौ द्यावापृथिव्यावंतरेणाकाशस्तस्मिन्नस्मिन्नाकाशे प्राण
आयत्तो यथामुष्मिन्नाकाशे वायुरायत्तो यथामूनि त्रीणि ज्योतींष्येवमिमानि पुरुषे त्रीणि ज्योतीं
षि यथासौ दिव्यादित्य एवमिदं शिरसि चक्षुर्यथासावंतरिक्षे विद्युदेवमिदमात्मनि हृदयं यथायम
ग्निः पृथिव्यामेवमिदमुपस्थे रेत एवमु ह स्म सर्वलोकमात्मानमनुविधायाहेदमेव पृथिव्या रूपमिदं २३

दिवः स य एवमेतां संहितां वेद संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमा
युरेति ॥२॥ अथातो निर्भुजप्रवादाः पृथिव्यायतनं निर्भुजं दिव्या[illegible]तनं प्रतृण्णमंतरिक्षायतनमुभय
मंतरेणाथ यद्येनं निर्भुजं ब्रुवंतमुपवदेदच्योष्ठावूराभ्यां स्थानाभ्यामित्येनं ब्रूयादथ यद्येनं प्रतृण्णं
ब्रुवंतमुपवदेदच्योष्ठा उत्तराभ्यां स्थानाभ्यामित्येनं ब्रूया[illegible]द्यस्त्वेवोभयमंतरेणाह तस्य नास्त्युपवा
दो यद्धि संधिं विवर्तयति तन्निर्भुजस्य रूपमथ यच्छुद्धे अक्षरे अभिव्याहरति तत्प्रतृ[illegible]स्याग्र उ एवोभ
यमंतरेणोभयं व्याप्तं भवत्यन्नाद्यकामो निर्भुजं ब्रूयात्स्वर्गकामः प्रतृण्णमुभयकाम उभयमंतरेणा
थ यद्येनं निर्भुजं ब्रुवंतं पर उपवदेत्पृथिवीं देवतामारः पृथि[illegible]वी त्वा देवतारिष्यतीत्येनं ब्रूयादथ यद्ये
नं प्रतृण्णं ब्रुवंतं पर उपवदेद्दिवं देवतामारो द्यौस्त्वा देवतारिष्यतीत्येनं ब्रूयादथ यद्येनमुभयमं
तरेण ब्रुवंतं पर उपवदेदंतरिक्षं देवतामारोंतरिक्षं त्वा देवतारिष्यतीत्येनं ब्रूयाद्यथा तु कथा च ब्रुवं
न्वाब्रुवंतं वा ब्रूयादभ्याशमेव तत्तथा स्यान्न त्वेवान्यत्कुशला ब्राह्मणं ब्रूयादति हन्न एव ब्राह्मणं ब्रू
यान्नाभिहन्न्वेच न ब्राह्मणं ब्रूयान्नमो अस्तु ब्राह्मणेभ्य इति ह स्माह शूरवीरो माण्डूकेयः ॥३॥

२४ अथातोनुव्याहाराः प्राणो वंश इति विद्यात्स य एनं प्राणं वंशमुपवदेद्धकुर्वंचेन्मन्येत प्राणं वंशं सम
धा उ ।। प्राणं मा वंशं संदधतं न शक्नोषीत्याह प्राणस्त्वा वंशो हास्यतीत्येनं ब्रूयादथ चेद शकुर्वं
तं मन्येत प्राणं वंशं समधित्सिषं तं नाशकः संधातुं प्राणस्त्वा वंशो हास्यतीत्येनं ब्रूयाद्यथालु
कथाच्च भुवं त्वा भुवं तं वा ब्रूयादभ्याश्रामे वयं तथा स्यान्नत्वेवान्यत्कुर्वाणं ब्राह्मणं ब्रूयादति
24 क्रान्तमेव ब्राह्मणं ब्रूयान्नातिक्रान्तं च न ब्राह्मणं ब्रूयान्नमो अस्तु ब्राह्मणेभ्य इति ह स्मा
ह भूरवीरो माण्डूकेयः ।। ४ ।। अथ खल्वाहुर्निर्भुज वक्राः पूर्वमक्षरं पूर्वरूपमुत्तरमुत्तररूप
यो वकाशाः पूर्वरूपोत्तररूपे अन्तरेण सा संहितेति स य एवमेतां संहितां वेद संधीयते प्रज
या पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेत्यथ वयं ब्रूमो निर्भुजवक्रा इति
ह स्माह ह्रस्वो माण्डूकेयः पूर्वमेवाक्षरं पूर्वरूपमुत्तरमुत्तररूपं यो वकाशः पूर्वरूपोत्तररू
पो अन्तरेण येन संधिं विवर्तयति येन स्वरात्स्वरं विजानाति येन मात्रामात्रां विभजते सा
संहितेति स य एवमेतां संहितां वेद संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लो

केनसर्वमायुरेत्यथहास्माहमध्यमःप्रातीबोधीपुत्रोऽस्मरेखल्विमेअविकर्षन्ननेकीकु
र्वन्नन्यथावर्णमाहतद्यासोमात्रापूर्वरूपोत्तररूपेअन्तरेणसंधिविज्ञपनीसाम्नउद्भवतिसा
म्नेवाहंसंहितांमन्यइतितदप्येतदृषिणोक्तंबृहस्पतेनपरःसाम्नोविदुरितिसएवमेतांसं
४ मि हितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेति॥५॥
बृहद्रथंतरयोरूपेणसंहितासंधीयतइतितारुक्ष्योवाग्वैरथंतरस्यरूपंप्राणोबृहतउभा
भ्यामुखल्वेसंहितासंधीयतेवाचाचप्राणेनचेतस्याहस्मोपनिषदिसंवत्सरंगारुक्षयतेता
रुक्ष्यएतस्याहस्ममात्रायांसंवत्सरंगारुक्षयतेतारुक्ष्यस्तदप्येतदृषिणोक्तंरथंतरमा
जभारावसिष्ठः॥भरद्वाजोबृहदाचक्रेअग्नेरितिसयएवमेतांसंहितांवेदसंधीयतेप्रज
यापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेतिवाक्प्राणेनसंहितेतिकौरव्यः
प्राणःपवमानेनपवमानोविश्वैर्देवैर्विश्वेदेवाःस्वर्गेणलोकेनस्वर्गोलोकोब्रह्मणासैषावरपरा
संहितासयोहेतामवरपरांसंहितांवेदैवहैवसप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेण

लोकेन संधीयते यथैषा संहिता स यदि परेण वोपसृतः स्वेन वार्थेनाभिव्याहरेदभिव्याहार्षं नेव
विद्याद्दिवं संहितागमं कि उषां देवानामेवं भविष्यतीति शाम्यंस्तथा स्यात्स य एवमेतां संहितां
वेद सं धियते प्रजयापशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेतीति बाष्कलसं
हितेति पंचालचंडो वाचा वै वेदाः संधीयन्ते वाचा छंदांसि वाचा मित्राणि संदधति वाचा सर्वा
णि भूतान्यथो वागेवेदं सर्वमिति तद्यत्रैतदधीते वा भाषते वा वाचि तदा प्राणो भवति वाचं तदा
प्राणं रेढ्यथ यत्तूष्णीं वा भवति स्वपिति वा प्राणे तदा वाग्भवति प्राणस्तदा वाचं रेढि ताव
न्योन्यं रीढो वाग्वै माता प्राणः पुत्रस्तदप्येतदृषिणोक्तमेकः सुपर्णः स समुद्रमाविवेश स इदं स
विश्वं भुवनं विचष्टे। तं पाकेन मनसापश्यमंतितस्तं माता रेढि स उ रेढि मातरमिति
स य एवमेतां संहितां वेद संधीयते प्रजयापशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्व
मायुरेत्यथातः प्रजापतिसंहिता जाया पूर्वरूपं पतिरुत्तररूपं पुत्रः संधिः प्रजननं संधानं
सैषादितिः संहितादितिर्हीदं सर्वं यदिदं किंच पिता च माता च पुत्रश्च प्रजननं च तदप्येतदृ

षि॥णो ऽयमदितिर्माता स पिता स पुत्र इति स य एवमेतां संहितां वेद संधीयते प्रजया पशुभिर्यश
सा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति सर्वमायुरेति॥६॥ ॥इति त्रयोदशोऽध्यायः॥
प्राणो वंश इति स्थविरः शाकल्यस्तद्यथा शालावंशे सर्वेऽन्ये वंशाः समाहिताः स्युरेवमस्मिन्प्राणे च
क्षुः श्रोत्रं मनो वागिंद्रियाणि शरीरं सर्व आत्मा समाहितस्तस्यैतस्यात्मनः प्राण ऊष्मरूपमस्थी
नि स्पर्शरूपं मज्जानः स्वररूपं मांसं लोहितमित्येतदन्यच्चतुर्थं तस्माद्रूपमिति ह स्माह ह्र
स्वो माण्डूकेयस्त्रयं त्वेव न एतत्प्रोक्तं तस्यैतस्य त्रयस्यास्थ्नां मज्ज्ञां पर्वणामिति त्रीणि तः षष्टिशता
नि त्रीणि तस्त्रानि सप्त विंशतिशतानि भवंति सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्राः स
एषोऽहः संमानश्चक्षुर्मयः श्रोत्रमयश्छंदोमयो मनोमयो वाङ्मय आत्मा स य एवमेतमहः समान
चक्षुर्मयं श्रोत्रमयं छंदोमयं मनोमयं वाङ्मयमात्मानं वेदाक्नो सायुज्यं सरूपतां सलोकतामश्नु
ते पुत्रापशुमान्भवति सर्वमायुरेति॥१॥ अथ कौठरव्यस्त्रीणि षष्टिशतान्यक्षराणां त्रीणि षष्टिशा
तान्युष्मणां त्रीणि षष्टिशतानि संधीनां यान्यक्षराण्यवोचाम हानि तानि यानूष्मणोऽवोचाम रात्रय

स्त्ताया न्त्संधीन वोचा मा हो रा त्राणां ते संधय इत्यधि दैवतमथाध्यात्मं यान्यक्षराण्यधिदैवतमवोचा
मास्त्तानि तान्यध्यात्मं यान्नक्षणोधिदैवतमवोचाम मनूज्ञानस्तूध्यात्मं मेष ह वै संप्रति प्राणो यन्म ज्जेतद्धे
तान् ह वा अनुते प्राणाद्धेतः सिच्यते यद्याऽनुते प्राणाद्धेतः सिच्येत पूयेन्न संभवेद्यान्संधीनधिदैवत
मवोचाम मंपर्वाणि तान्यध्यात्मं तस्यैतस्य त्रयस्यास्थ्यां मज्ज्ञां पर्वणामिति पंचेतश्चत्वारिंशच्छतानि
पंचेतस्त्तदशीति सहस्त्रं भवत्यशीति सहस्त्रं वा अर्कलिनो बृहतीर हरभिसंपादयंति स एषोक्ष
र संमानं श्रक्षुर्मयः श्रोत्रमयश्छंदोमयो मनोमयो वाङ्मय आत्मा स य एवमेतमक्षरसंमानं च
क्षुर्मयं श्रोत्रमयं छंदोमयं मनोमयं वाङ्मयमात्मानं वेदाक्षराणां सायुज्यं सरूपतां सलोकतामम
श्नुते पुत्रापशुमान् भवति सर्वमायुरेति ॥८॥ चत्वारः पुरुषा इति बाध्वः शारीरः पुरुषः छंदः पुरुषो
वेदपुरुषो महापुरुष इति शारीरः पुरुष इति यमवोचाम स य एवायं दैहिक आत्मा तस्य योयमशा
रीरः प्रज्ञात्मा स रसः छंदः पुरुष इति यमवोचामाक्षरसमाम्नाय एवं तस्यैतस्याकारो रसो वेदपु
रुष इति यमवोचाम येन वेदान्वेद ऋग्वेदं यजुर्वेदं सामवेदं तस्यैतस्य ब्रह्मा रसं तस्माद्ब्रह्माणं ब्र

श्लिष्टं कुर्वंस्तयोर्यज्जास्यो लवणं पश्येन्महापुरुष इति यमवोचाम संवत्सर एव स ध्वंसयं नन्यानि भूता
न्येक्याभावयं नन्यानि तस्यैतस्यासावादित्यो रसः स यश्चायमशरीरः प्रज्ञात्मा यश्चासावादित्य
एकमेतदिति विद्यात्तस्मात्पुरुषं पुरुषं प्रत्यादित्यो भवति तदप्येतदृषिणोक्तं चित्रं देवानामुदगादनी
कं चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्रा द्यावापृथिवी अंतरिक्षं सूर्य आत्मा जगतस्तस्थुषश्चेत्ये
तामनुविधं संहितां संधीयमानां मन्य इति ह स्माह बाध्व एतं ह्येव बह्वृचा महत्युक्थे मीमांसंत
एतमग्नावध्वर्यव एतं महाव्रते छंदोगा एतमस्यामेतं दिव्येतं वायावेतमाकाश एतमप्स्वेतमोष
धीष्वेतं वनस्पतिष्वेतं चंद्रमस्येतं नक्षत्रेष्वेतं सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते स एष संवत्सर
संमानश्चक्षुर्मयः श्रोत्रमयश्छंदोमयो मनोमयो वाङ्मय आत्मा स य एवमेतं संवत्सरसंमानं च
क्षुर्मयं श्रोत्रमयं छंदोमयं मनोमयं वाङ्मयमात्मानं परस्मै शंसति ॥१॥ दुग्धदोहा अस्य वेदा भवं
ति न तस्यानूक्ते भागोऽस्ति न वेद सुकृतस्य पंथानमिति तदप्येतदृषिणोक्तं यस्तित्याज सखिवि
दं सखायं न तस्य वाच्यपि भागो अस्ति। यदीं शृणोत्यलकं शृणोति नहि प्रवेद सुकृतस्य पंथा

२७ भितिनतस्यालोकेभागोस्तिनवेदसुकृतस्यपंथानमित्येतत्तउक्तंभवतिस्तस्माद्देवंविद्वान्नप
रस्माअग्निंचिनुयान्नपरस्मैमहाव्रतेनस्तुवीतनपरस्माएतदहःशंसेत्कामंपित्रेवाचार्यायवा
शंसेदात्मनएवास्यतत्कृतंभवतिसयश्चायमशरीरःप्रज्ञात्मायश्चासावादित्यएकमेतदित्य
वोचामतोयत्रविहीयेतेचंद्रमाइवादित्योदृश्यतेनरश्मयःप्रादुर्भवंतिलोहिनीद्यौर्भवतियथामंजि
27 ष्ठाव्यस्तःपायुःकाककुलायगंधिकमस्यशिरोवायतिसंपरेतोस्यात्मानचिरमिवजीविष्यती
त तिविद्यात्सयत्करणीयंमन्येततत्कुर्वीतयदंतियच्चदूरकइतिसप्तजपेदादित्यस्तस्यरेतस
इत्येकायत्रब्रह्मापवमानेतिषट्कुद्वयंतमसस्परीत्येकाथापियत्रछिद्रइवादित्योदृश्यते
रथनाभिरिवाभिख्यायेतछिद्रांवाछायांपश्येत्तदप्येवमेवविद्यादथाप्यादर्शेवोदकेवा
जिह्मशिरसंवाशिरसंवात्मानंपश्येत्विपर्यस्तेवाकन्याकेजिह्मेनवादृश्येयातांतदप्येव
मेवविद्यादथाप्यपिधायाक्षिणीउपेक्षेततद्यथाबटरकाणिसंपतंतीवदृश्यंतेतानियदान
पश्येत्तदप्येवमेवविद्यादथाप्यपिधायकर्णाउपश्रृणुयात्सएषोग्निरिवप्रज्वलतोरथस्ये २७

वोपब्दिस्तं यदा न शृणुयात्तदप्येवमेव विद्यादथापि यत्र नील इवाग्निर्दृश्यते यथा मयूरग्री
वा मेघे वा विद्युतं पश्येन्मेघे वा विद्युतं पश्येन्महामेघे वा मरीचीरिव पश्येत्तदप्येवमेव
विद्यादथापि यत्र भूमिं ज्वलन्तीमिव पश्येत्तदप्येवमेव विद्यादिति प्रत्यक्षदर्शनान्यथ स्व
प्नाः पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ति वराह एनं हन्ति मर्कट एनमास्कन्दयत्याशु वायु
रेनं प्रवहति सुवर्णं खादित्वापगिरति मध्वश्नाति बिसानि भक्षयत्येकपुण्डरीकं धारयति
खरैर्वराहैर्युक्तैर्याति कृष्णां धेनुं कृष्णवत्सां नलदमाली दक्षिणामुखो व्राजयति स यद्ये
तेषां किंचित्पश्येदुपोष्य पायसं स्थालीपाकं श्रपयित्वा रात्रीसूक्तेन प्रत्यृचं हुत्वान्येना
न्नेन ब्राह्मणान्भोजयित्वा चरुं स्वयं प्राश्नीयात्स यो तोश्रुतो गतो मतो नतो दृष्टो विज्ञातो
नादिष्टः श्रोता मन्ता द्रष्टा देष्टा घोष्टा विज्ञाता प्रज्ञाता सर्वेषां भूतानामन्तरपुरुषः स म आ
त्मेति विद्यात् ॥१०॥ अथ खल्वियं सर्वस्यै वाच उपनिषत्सर्वा ह्येवेमाः सर्वस्यै वाच उपनिष
द इमां त्वेव वाच क्षलते पृथिव्या रूपं स्पर्शा अन्तरिक्षस्योष्माणो दिवः स्वरा अग्ने रूपं स्पर्शा वायो

ऊष्माण आदित्यस्य स्वरा ऋग्वेदस्य रूपं स्पर्शा यजुर्वेदस्योष्माणः सामवेदस्य स्वराश्चक्षु
षो रूपं स्पर्शाः श्रोत्रस्योष्माणो मनसः स्वराः प्राणस्य रूपं स्पर्शा अपानस्योष्माणो व्यानस्य
स्वरा अथ खल्वियं दैवी वीणा भवति तदनुकृतिरसौ मानुषी वीणा भवति यथास्याः शिर एवम
मुष्याः शिरो यथास्या उदरमेवममुष्या अम्भणं यथास्यै जिह्वैवममुष्यै वादनं यथास्यास्तंत्रय ए
वममुष्या अंगुलयो यथास्याः स्वरा एवममुष्याः स्वरा यथास्याः स्पर्शा एवममुष्याः स्पर्शा यथा
ह्येवेयं शब्दवती तर्द्मवत्येवमसौ शब्दवती तर्द्मवती यथा ह्येवेयं लोमशेन चर्मणा पिहिता भ
वत्येवमसौ लोमशेन चर्मणा पिहिता लोमशेन ह स्म वै चर्मणा पुरा वीणा अपिदधति स
यो हैतां दैवीं वीणां वेद श्रुतवदनो भवति भूमिप्रास्य कीर्तिर्भवति यत्र क्व चार्या वाचो भा
षन्ते विदुरेणं तत्राथातो वाग्रसो यस्यां संसदि धीयानो वा भाषमाणो वा न विररुचुषेत तत्रै
ता मृचं जपेदोष्ठापिधाना नकुली दंतैः परिवृता पविः ॥ सर्वस्यै वाच ईशाना चारु मामिह वाद
येदिति वाग्रसः ॥११॥ अथ हास्मा एतत्कृष्णहारितो वाग्ब्राह्मणमिवोपोदाहरति प्रजापतिः

प्रजाः सृष्ट्वा व्यस्रंसत संवत्सरः स छंदोभिरात्मानं समदधाद्यच्छंदोभिरात्मानं समदधात्तस्मात्संहि
तां तस्यै वा एतस्यै संहितायै णकारो बलं षकारः प्राण आत्मा स यो हैतौ णकारषकारावनुसंहित
मृचो वेद सबलां सप्राणां संहितां वेदायुष्यमिति विद्यात्स यदि विचिकित्सेत्सणकारं ब्रवाणी
३ं। अणकारा३ं इति। सणकारमेव ब्रूयात्सषकारं ब्रवाणी३ं। अषकारा३ं इति॥ सषकारमेव ब्रू
यात्ते यद्वयमनुसंहितमृचो धीमहे यच्च मांडूकेयीयमध्यायं प्रब्रूमस्तेन नौ णकारषकारावु
पाप्ताविति ह स्माह ह्रस्वो मांडूकेयोऽथ यद्वयमनुसंहितमृचो धीमहे यच्च मांडूकेयीयम
ध्यायं प्रब्रूमस्तेन नौ णकारषकारावुपाप्ताविति ह स्माह स्थविरः शाकल्य एतद्ध स्म वै तद्वि
द्वांस आह ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे वाचि हि प्राणं
जुहुमः प्राणे वा वाचं यो ह्येव प्रभवः स एवाप्ययस्ता एताः संहिता नानंतेवासिने प्रब्रूयान्नासंव
त्सरवासिने नाप्रवक्त्रे इत्याचार्या आचार्याः॥१२॥ ॥इति तृतीयारण्यके द्वितीयोऽध्यायः॥ ॥
॥ओं नमः॥ विदा मघवन्विदा गातुमनुशंसिषो दिशः। शिक्षा शचीनां पते पूर्वीणां पुरूवसो॥ आभि

ष्ट्वमभिष्टिभिः प्रचेतन प्रचेतया इंद्र द्युम्नायन इष एवा हि शक्रः। राये वाजाय वज्रिवः शविष्ठ
वज्रिन्नृञ्जसे॥ मंहिष्ठ वज्रिन्नृञ्जस आ याहि पिब मत्स्वा विद्मा रायः सुवीर्यं भुवो वाजानां प
तिर्वशाँ अनु। मंहिष्ठ वज्रिन्नृञ्जसे यः शविष्ठः शूराणां॥ यो मंहिष्ठो मघोनां चिकित्वो अभि नो
नय॥ इंद्रो विदे तमु स्तुष वशी हि शक्रः। तमूतये हवामहे जेतारमपराजितं। स नः पर्षदति द्वि
ष क्रतुश्छंद ऋतं बृहत्॥ इंद्र धनस्य सातये हवामहे जेतारमपराजितं॥ स नः पर्षदति द्विषः
स नः पर्षदति स्रिधः। पूर्वस्य यत्ते अद्रिवः सुम्न आ धेहि नो वसो॥ पूर्तिः शविष्ठ शस्यत ईशो
हि शक्रः। नूनं तं नव्यं सन्यसे प्रभो जनस्य वृत्रहन्॥ समन्येषु ब्रवावहै शूरो यो गोषु गच्छति
सखा सुशेवो अद्वयाः। एवा ह्येवैवा ह्यग्ने। एवा ह्येवैवा हीन्द्र। एवा ह्येवैवा हि विष्णो। एवा
ह्येवैवा हि पूषन्। एवा ह्येवैवा हि देवाः। एवा हि शक्रो वशी। हि शक्रो वशाँ अनु। आ यो मन्याय मन्य
वे उपो मन्याय मन्यवे उपे हि विश्वधा विधाम युवन्विष्णुं ३॥ ॥१॥ इति चतुर्थारण्यकं समाप्तं॥
महाव्रतस्य पंचविंशतिं सामिधेन्य एकविंशतिं तोश्नागुपात्तमायाः समिधाग्निनमित्विचतस्रोवि

भ्वकर्मणऋषभंउपालंभनीयंउपांश्वाज्यप्रउगेविश्वजितोहोत्राश्चतुर्विंशादीरथयंतीरपस्युवइति
चब्राह्मणाच्छंस्यावपेतप्रातःसवनेतात्रस्याभिवयसोअस्यपाहीतिमाध्यंदिनेत्रिकद्रुकेषुमहि
षोयवाशिरमितिसोतिन्त्वोग्रियर्यऐंद्रयाहूपनःपरावतइप्रायुहिघोरसुरोअमन्नत।प्रोष्वस्मेपु
रोरथमित्योनोनुरूपश्चतुर्विंशान्मरुत्वतीयस्यातानोसत्त्युमेजशितःसाभिवेगःपिबासोममभि
यमुग्रतर्द्दःऊर्यांसुभासवंयसःसनीळामरुत्वांइंद्रव्रषभोरणायाजनिष्ठाउग्रःसहसेतुरायेति
मरुत्वतीयंसंस्थितेमरुत्वतीयेहोताविसंस्थितसंचरेणनिष्क्रम्याग्नीध्रीयेतिस्रआज्याहुतीर्जुहो
त्यडुंबरेणस्रुवेणानुमामिंद्रोअनुमांबृहस्पतिरनुसोमोअनुवाग्देव्यावीतु।अनुमांमित्रावरुणा
विहावतामनुद्यावापृथिवीपूर्वहूतौ।आदित्यामाविश्वेअवंतुदेवाःसमस्तराजानोयउताभिषिक्ताः।
वायुःपूषावरुणःसोमोअग्निःसूर्योनक्षत्रैरवत्विहमानु।पितरोमाविश्वमिदंचभूतंपृथिवीमात
रोमरुतःस्वर्काःयेअग्निजिह्वाउतवायजत्राःस्तेनोदेवाःसुहवाःशर्मयच्छन्तेतिदक्षिणेमार्जा
लीयेलीदत्रास्रुच्यक्तमांचतुर्गृहीतंपूर्वमवदायोत्तरतोग्नेरुपनिधायविहरणप्रभृतिमध्यंदिने

मार्जालीयोजागरितोभवतितदस्मिन्परिवत्लेजुहोतिप्राग्द्वारेवोदग्द्वारेस्वोआगुदग्द्वारेवाग्निहि
वानाध्यष्व्यःपृथिवीवसुषदाभूयासंमंतरिक्षमिवानाप्यंद्यौरिवानाधृष्योभूयासंसूर्यइवाप्रति
धृष्यश्चंद्रमाइवपुनर्भूर्भूयासंमनइवापूर्वंवायुरिवभ्लोकभूर्भूयासंमहरिवस्वंरात्रिरिवप्रियो
भूयासंगावइवपुनर्भुर्वोमिथुनमिवमरीचयोभूयासंमापइवरसंओषधयइवरूपंभूयासम
न्नमिववषिनु॥यज्ञइवप्रभूर्भूयासंब्रह्मेवलोकेक्षत्रमिवभ्रियाभूयासंयदग्नएषासमितिर्भ
वातीत्यत्रविभजाथवीशेतित्रीण्यनन्वेचमत्रतिष्ठन्नादित्यमुपतिष्ठतेपर्यवेत्तेप्रदक्षिणमा
वर्त्यैतेष्वेवास्वाहाकारेरेहोवा३इदंमधूर३इदंमधू३इदंमधु॥इमंतांव्रसुतंपिबा३इदंमधूर
इदंमध्वितिवचप्रेष्याःसंशास्मिन्पूर्णकुंभास्तिस्रोवमाःषळुत्तमाइमंधिष्ण्यमुदकुंभंचत्रिःप्र
दक्षिणंपरिव्रजाथदक्षिणैःपाणिभिर्दक्षिणानूरूनाघ्नानाएहोवा३इदंमधू३इदंमध्वितिव
दत्यः॥१॥उपाकृतेस्तोत्रेत्रेधंतिनयाथात्रोत्तरेचंमार्जालीयेग्रोषमंतवेदातिप्रदक्षिणमग्नि
निष्क्रम्याग्रेणपरूपपुरस्तात्प्रत्यङ्मुखःस्थित्वल्लग्नेःशिरउपतिष्ठतेनमस्तेगायत्राययत्रेशि

रइति तेनैव यथेतं प्रत्येत्य दक्षिणमुदङ्मुखः पक्षं नमस्ते राथन्तराय यस्ते दक्षिणः पक्ष इत्यपरेणाग्नि
पुच्छमतिक्रम्य प्राङ्मुख उत्तरं नमस्ते बृहते यस्त उत्तरः पक्ष इति पश्चात्प्राङ् पुच्छं नमस्ते भद्रा
यय ज्ञे पुच्छं या ते प्रतिष्ठेति दक्षिणतः पुच्छस्यात्मानं नमस्ते राजनायु यस्त आत्मेति ॥२॥ यथेतं
सदः प्रसर्पति पुरस्तात्प्रेङ्ख उपक्लृप्तो भवति स्थूणे रज्जू वीवध इत्येतत्प्रक्षाल्य तीर्थेन प्रपाद्यो
त्तरेणाग्नीध्रीयं परिव्रज्य पूर्वया द्वारा सदः सर्वौ धिष्ण्यानुत्तरेणौदुम्बराणि काष्ठानि प्रेङ्खस्य भ
वन्ति पालाशानि भिन्नानि वा त्रीणि फलकान्युभयतः स्तब्धानि क्रीशास्त्र्यभ्रतावत्य इषुमात्रः
प्राङ् प्रेङ्खो निमुष्टिकस्तिर्यङ्दङ्गग्रः प्राग्ग्राभ्यां सूचीभ्यां समुतोदक्षिणोत्तरे स्थूणे निखायाभितो
होतृषदनं वीवधमत्यादधात्यास्यसंमितं कर्तुः कुष्ठास्तु छिद्राणि प्रेङ्खस्य भवन्ति रज्जूभ्यामूर्ध्व
मुद्रयति दक्षिणतो दक्षिणयोत्तरतः सव्यया ताम्ये त्रिगुणे स्यातां सव्यदक्षिणे पञ्चव्यायामे द्विगु
णे वा वर्धे त्रिः प्रदक्षिणपर्यस्योर्ध्वग्रन्थिं निष्कर्यं बध्नाति शारवाभिर्वल्सीभिर्वा पर्यर्षं त्यप्रकं पिच
लुरं खल्वेनेष विभृमः प्रेङ्खस्यान्मुष्टिमात्रेण वा दक्षिण उत्तराहितं तरः समो वा पदमात्रे धिष्ण्या

तू॥१॥ निष्क्रिते प्रेंखे होतावाणमौदुंबरंग्रानतं तुमुभाभ्यांपरिगृह्योत्तरलउपोहतेयथावीणां
सप्तभिः स्वछंदोभिः श्चतुरुत्तरैः स्छानानिषस्योर्ध्वमुदृत्स्कीयाहेदृशाभिर्गायत्रेणत्वाछंदसो
द्रुहाम्योद्धिहेयातानुष्टुभेणत्वावार्हतेनत्वापाङ्क्तेनत्वात्रैष्टुभेनत्वाजागतेनत्वावैराजेनत्वा
हेपदेनत्वातिछंदसात्वेतिछंदांस्यतुक्रम्यस्छानानामनुपरिक्रमणमौदुंबर्यांदुर्याश्चारव
पासपल्लाश्रायामूलदेशानवाणंत्रिरूर्ध्वमुल्लिखतिप्राणायत्वापानायत्वाव्यानायत्वोल्लिखा
मील्येनन्लेभ्योपिकामेभ्यः पुनरपिनत्रूल्लिखामीतिस्रयादथैनंसप्ताखंछंदोगेभ्यःप्रयछ
तिमन्तेभ्यस्त्वेतिपश्चार्द्धफलकेपाणीप्रतिष्ठापयतिप्राणमनुप्रेंखस्वेतिप्रांचंप्रेंखंप्राण
यतिव्यानमनुवीखस्वेतितिर्यंचमपानमन्वीखस्वेत्यभ्यात्मंभूर्भुवःस्वरितिजपतिप्राणा
यत्वेतिप्रांचमेवव्यानायत्वेतितिर्यंचमपानायत्वेत्यभ्यात्ममेवसवस्त्वागायत्रेणछंदसारोहं
तुतानन्वारोहामीतिपश्चार्द्धफलकेरत्नीप्रतिष्ठापयत्यथपूर्वफलकंनानापाणिभ्यामभिप
द्यतेयथाहिस्रप्स्यन्मध्यमंछुबुकेनोपस्पर्शोद्धयोर्वासंधिरेप्रस्तात्रैष्टुभेनछंदसारोहंतु

तानन्वारोहामीति दक्षिणं सक्थ्यतिहरत्यादित्यास्त्वा जागतेन छंदसारोहंतु तानन्वारोहामी
ति सव्यं विश्वे त्वा देवा अनुष्टुभेन छंदसारोहंतु तानन्वारोहामीति समारोहति पश्चात्सस्य
धिष्ण्यस्य दक्षिणं पादं ग्रावं प्रतिष्ठापयत्यथ सव्यं यदेतरः श्राम्येदथेतरं यदेतरोथेतरं नोभौ
विभृमो कुर्यात्तूर्च्यां न्होत्रकाः समारोहंति ब्रह्मा चोदुंबरीमासंदीमुपज्ञातां यदि कस्मैचिद
वश्यकर्मणे जिगमिषेत्तां दक्षिणस्य पालं प्राङ् वरूढेच्च रितानमर्थमेरमे वाजपेयावृता रोहे
तं ॥४॥ प्रस्तोतारं संशास्ति पंचविंशस्य स्तोमस्य तिस्रस्ववर्धत्त्वतीयास्त्वर्हुत्रयोदशासुवा
शि पदिष्टासु प्रथमं प्रतिहारं प्रब्रू तादि त्यर्द्धत्रयोदशासु प्रगाव्वयते तिजात्तरूण्यंः प्रोक्तेज
पतिसुपर्णो सिगरत्माना ॥ प्रमां वाचं वदिष्याभिव ऊवदिष्यंतीव ऊपतिष्यंतीव ऊकरि
ष्यंतीव ऊसनिष्यंतीव होभूयः करिष्यंतीस्वर्गच्छंतीसर्वे दिष्यंतीस्वः पतिष्यंतीस्वः करि
ष्यंतीस्वः सनिष्यंतीस्वरिमं यज्ञं वक्ष्यंतीस्वर्मा यजमानं वक्ष्यंतीभिति दीक्षिते यजमानत्रा

ब्दो ना। दीक्षिते स्वर मुभिति यो स्य प्रिय स्यात्तं तु वक्ष्यं नीमिति ब्रूयाद्‌उक्तवीयामि च सं प्राणो
वाच्या सम हं वाचा सं चक्षुः मनसा सम हं मनसा सं श्रोत्रमात्मना सम हमात्मना मयि महा
न्मयि भर्गो मयि भगो मयि भुजो मयि स्तोमो मयि स्तोमो मयि श्लोको मयि घोषो मयि यशो
मयि श्री र्मयि कीर्त्ति र्मयि मुक्तिरित्या हूयवागिति जपति त्रय आहावाः शास्त्रादे निविदः
परिधानीयाया इति शब्दानध्वर्युविः कोरयं तेतस्मिन्नह निघ्रमल मन्त्रं दद्यात् जपुत्रेण
चर्मण्याधयंत्या ग्नं तिभ्भिडुडुभिंपत्यभ्य कांडवीणाभ्रेतानां च मैथुनं ब्रह्मचारि पुंश्च
ल्योः संप्रवादो नेकेनसाम्नानिष्के वल्यायस्कवते राजनस्तो त्रियेण प्रतिपद्यते॥५॥ तदि
दा समुव नेषु ज्येष्ठ लां सुलेकी र्तिमिघ वन्महिलाम्रयइ शोवद्धेवीयोय न्त णा मुत्वान्नतमं
गाभिरुक्थेभि रितितिस्रोत्र हे के स्वाहो स्वादीयः स्वादुवास्रजा समदः सुमधु मधुनाभि योधी
रित्यात्मन ए ते पदे उद्धृत्य पक्षपदे प्र त्य वदधात्यभ्यायं तोम घवान्निंद्र गाजिनो गामभ्वंस्य

इंद्रसंकिरेत्येतयोभ्र स्थाने इतरे भ्रियमहगोरश्रममात्मं(ध)तेसंपक्षयोः पतनायनदंवओद
तीनाभित्येतयेतानिव्युतिषजतिपादैःपादान्व्हतीकारं नदवंत्यक्षराणिप्रथमायांचपुरुषा
क्षराण्युपदधातिपादेषेकेकंमवसानेत्तीयवर्जंसखल्विहरत्यपिनिदर्शनायोत्तहरिष्या
मः।।तदितसभुवनेषुज्येष्ठंपु।। नदंवओदतीनां।यतोजज्ञउग्रस्त्वेषनृम्णाः।। नदंयोयुवती
नोउ सद्योजज्ञानोनिरिणातिशत्रूनृत्यतिंवोअध्यानां।अनुयंविश्वेमदंत्यूमाःषोधेनूना
भिषुध्युस्सोउभित्येवमेतांत्रिरन्यास्सुचेत्समाम्नातास्सुराजनेनसाम्नास्तुवीरन्यथास्त्वो
नेताइहैवेमोअसमाम्नातास्सुचेत्स्तुवीरन्तसमाम्नातस्यतावतीरुदृत्यतत्रताःशंसेद
होएवेमोअन्यास्सुचेत्त्राकस्सदतोहसस्तास्त्वादितसेत्येतहादिशास्त्रमविहलश्चात्रप्रति
गरस्ताअस्यस्सदतोहसइत्येतहादिःस्सदतोहाःस्सदतोहाः।।६।।इतिपंचमारण्यकेप्रथ
मोध्यायः।।ग्रीवाः।।यस्यदमारजस्त्वजा।युजोवनंसहेः।इंद्रस्यवंत्येव्हत।।नाध्वेषुआद
धर्षितादृष्पाणंधृषितंसदः।पुरायदीमतिव्यधिरिंद्रस्यधृबितंसहः।सनोददातुतरयिं

३२ रयीपिशंगसंदृशं। इंद्रः पतिस्तुवस्तमोजनेष्वास्य दद्दोहाः शिरोगायत्रमिंद्रमिद्गाथिनोबृ
हदित्यन्यास्तुचेत्समाम्नाताकस्तुवीरन्नुभयासंस्थानेविपर्ययोसमाम्नातास्तुचेस्तुवी
रुन्मित्राय स्तुचस्यस्ययोरमासृद्दोहाविजवः॥ स्तुतस्तेसोमउपयाहियज्ञमस्त्वामदंपु
33 रुवारंमघाय। मंहिष्ठइंद्रवृत्रतुरोगणेध्ये। सुसाहत्वृत्रहत्येषुत्रात्र नुमुविकाहएषुः। स
नोनेतारंमहयामइंद्र। इंद्रनोवसुसमजः पर्वतेष्ठाः प्रतिवामजोषी॥ इंद्रःत्रात्वभिजोह
त्रएवेः॥ स्तुद्दोहाइत्येतत्त्रयंग्रावाः शिरोविजवः सर्वमर्धर्च्यं॥ ७॥ राथंतरोदक्षिणः पक्षो
भित्वाभ्युरनोनुमोभित्वाष्टवेपितयइतिरथंतरेस्यस्तोत्रियानुरूपोप्रगाथोचतस्त्रसतोः
षड्बृहतोः करोतोंद्रस्यनुवीर्याणिप्रवोचं। त्वेहयत्पितरश्चिन्नइंद्रेतिपंचदशायुस्त्रिगम
भ्यंगोवृषभोनभीमउग्रोजज्ञेवीर्यायस्वधावानुडुंब्रस्त्राणयेरत्नुभ्रवस्यातमहइंद्रोत्यस्ये
तिपंचस्थानान्यानइंद्रोदूरादानआसादितिसंपातेइत्याहिसोमइन्मदइतिपंक्तिः स्व
दद्दोहाबाहंतउत्तरस्त्वामिद्धिहवामहेत्वंह्येहिचेरवइतिबृहतः स्तोत्रियामुरूपोप्रगा

इन्द्र

थोत्वतस्वः सती: षड्व्हती: करोतितनुहुहियो अभिभूत्योजाः सुत इ त्वं निमिश्ल सोम
इत्रिणाण्यभूरेकोरयिपतेरयीणामिति ष्टौस्तकानिकथोमहामव्धत्केस्य होतुरिति
संपातइंद्रोमद्यवाव्धइतिपंक्तिः स्त्रदहोहारथंतरोदक्षिणःपक्षः पंचदशस्तोमएक
शतंवसिष्ठस्यासाहोबार्हतउत्तरः सप्तदशस्तोमोष्टिशतंभरद्वाजस्यासाहोमंदुषुच्छं
द्विपदास्विमानुकंभुवनानीसीषधामायाहिवनसासहेलिनवसमाम्नाताअथासमाम्ना
ताःप्रवइंद्रोयवृत्रहंतमायविप्रागाथंगायेलयुज्जुजोषतिअर्चंत्यर्कंदेवतास्वर्काआस्तो
भतिश्रुतोयुवासइंदुः॥उपप्रक्षेमधुमतिक्षियंतःपुष्यंतोरयिंधीमहेतमिंद्र।विश्वतो
दावन्विश्वतोनआभरयंत्वाशविष्ठमीमहेसस्तुप्रणीतेनृतमःस्वराळसिमंहिष्ठोवाजसातये।
त्वंहेकइंद्रोविवेसनादभृष्टकओजसा।।विश्वस्यप्रस्तोमविघान्युरावायद्दिवेहासन्नूनंइ
षंनोमित्रावरुणाकर्तनेळांपीवरीमिषंकृणुहीनइंद्र।।शंपदंमघंरयिषाणिनसोमोअब्रेतं
हिनोतिनस्यशाद्रुयिः।एषब्रह्मेतितिस्रआधर्षस्मा इत्येकास्त्रदहोहायद्यागानेतिधाय्या

सूददोहाः ॥८॥ गायत्रीत्त्वचाशीतिर्मरुतांइंद्रोय ओजसे ति तिस्र उत्तमा उद्धरति पुरोळाशं
नोअंधस इति तिसृषु इंद्र इत्सोमपा एक इत्येतत्प्रभृतीनां तिस्र उत्तमा उद्धरति तां सांस्वा
दवः सोमा आयाहीत्येतामुद्धृत्य नह्यन्यं बळाकरमित्येतां प्रत्यवदधाति जज्ञानो नु शत
क्रतुरित्येकां पुरुहूतं पुरुष्टुतमिति शेषउद्धृद्दमिष्कृतामघमित्युत्तमामुद्धरति प्रकृ
तान्य जीषिणं आ घाये अग्निमिंधत आतून इंद्र क्षुमं तमिति सूक्ते सूददोहाः ॥९॥
बार्हतीत्त्वचाशीतिर्मा चिदन्यद्वि शंसतेत्येक यानत्रिंशत्पिबा सुतस्य रसिन इति विंश
तेः सप्तमीं चाष्टमीं चोद्धरति यादिंद्र प्रागपागुदगिति चतुर्दशीं वयं घत्वा सुतावंत इति पंच
दशीमोषुत्वा वाघतश्चनेत्येतस्य द्विपदां चोद्धरति शेषं तरं च प्रगाथमथ हा स्यनकिः स्क
दासो रथमित्येतं प्रगाथमुद्धृत्य त्वामिद्धा ह्योनर इत्येतं प्रगाथं प्रत्यवदधात्यभिप्रवः स्क
राधसमिति षड्वालखिल्यानां सूक्तानि यः सत्राहा विचर्षणिरिति शेषो यं ते अस्तु हर्य
त इति सूक्ते उभयं शृणवच्च न इति सप्तमीं चाष्टमीं चोद्धरति तरोभिर्वो विदद्वसुमित्य

तमामुद्धरन्ति यो राजा चर्षणीनामित्येकादशं तं वोदस्मस्मृतीषहं मा नो विश्वासु हव्यो या इं
द्रभुजआभर इति नव स्तूददोहाः ॥१०॥ ओहिङ्हीलचात्रीति त्र्यर्च इंद्र सोमपातम इति सूक्ते त
न्वभिप्रगायतेत्यन्तमामुद्धरन्तीन्द्राय साम गायत ॥ सखाय आशिषामहीति तिस्र उत्तमा उ
द्धरन्ति य एक इद्विदयत आयाह्यद्रिभिः सुतं यस्य त्यच्छंबरं मद इति त्रयस्तृचा गायत्र्यः संपदे
ऽहिङ्हः सप्त सप्त गायत्र्यः षट् षळुष्णिहो भवन्ति यद्दिंद्राहं यथा त्वं प्रसम्राजं चर्षणीनामिति
सूक्ते उत्तरस्योत्तमे उद्धरन्ति वार्त्रहत्याय शवस इत्यन्तमामुद्धरन्ति सुरूपकृत्नुमूतय इति
त्रीण्येंद्र सानसिं रयिमिति सूक्ते य आनयत्परावत इति तिस्र उत्तमा उद्धरन्ति रेवती
र्नः सधमाद इति तिस्रः स्तूददोहा इत्येताशीतिस्त्रस्तृचाशीतयः सर्वा अर्द्धर्च्या अन्त
मशीतय उदरं वशास्त्वा वतः पुरूवसविलि वरोः समितः सुमनितरित्येलकं तोददारे क्ण
इति द्विपदान्नमथेत्येकपदा ता अस्य स्तूददोह स इत्येतदन्तः स्तूददोहाः स्तूददोहाः ॥११॥
इति पंचमारण्यके द्वितीयोध्यायः ॥ ॥ ॐ ॥ इंद्राग्नी युवं सु न इत्येतस्यार्द्धर्चा गायत्री

वो

कारमुत्तरमुत्तरस्यानुष्टुप्कारं प्रागुत्तमायाः प्रवो मंहे मंदमानायांधस इति निविद्धानं
वनेनवायोन्यधावियिचाकन्यो ज्ञातुं एव प्रथमो मन स्वान्निति ते अंतरेणा याह्यर्वाङ् उप वंधुरे
ष्ठा विंधुंद ध्राणं समनेव बहूनामित्येतदाव पनं दृशो नामो ड्रोणांत्रिष्टुप् जगती नौ बृहती ती
संपनानां याबतीरा वपेरं स्तावं त्यूर्ध्व मायुषों वषी मिज्ञ जीवि वेत्से वत्सरात्सं वत्सरा दू
रातो नवा त्यभ्र षुवाजिनं देवजूतं अंद्रो विश्वं विराजतीत्येकपदं द्वि विश्वा अतिवि वधानि
त्यानुष्टुभं तस्य प्रथमायाः पूर्वमर्द्धर्चं शंस्त्वोत्तरेणार्द्धर्चेनोत्तरस्याः पूर्वमर्द्धर्चं व्यतिषज
ति पादैः पादाननुष्टुप्कारं प्रागुत्तमायाः पूर्वस्मात्पूर्वस्मादर्धर्चादुत्तरमुत्तरमर्धर्चं व्यति
षजति प्रकृत्या शेषः पिबा सोममिंद्र मंदतु त्वेति षड्ज्योतिष्टे इंद्र सदने अकारीत्येतस्य च
तस्त्रः शंस्त्वोत्तमामुपसंतत्योपोत्तमायाः परिदधाति परिहितउक्थ्य उक्थ्यसंपदं जप
त्य स्थवीर्यस्य स्थानेन उक्थ्य दोहः ॥ १२ ॥ मूर्ध्ना लोकानाम स्मि वाचोरसस्तेजः प्राणस्याय
तनं मनसः संवेशः श्रोत्रस्य प्रतिष्ठा हृदयस्य संवेदं ॥ इंद्रः कर्मा क्षितममृतं व्योम अनंतं सु

[illegible]

त्यं विजिज्ञानं विवाचनं मनो वाचो विभुः सर्वस्मा उत्तरं ज्योतिरूधः प्रतिवादः पूर्वं सर्वं वाक्प
रागर्वाकें सप्तु सलिलं धेनु पिन्वति। चक्षुः श्रोत्रं प्राणः सत्यसंमितं वाक्प्रभूतं मनसो विभू
तं हृदयाग्रं ब्राह्मणमत्तमं नभुभे वर्षपवित्रं गोमगं पृथिव्युपरं वरुणवायिवितमुतपस्वन्विं
दु ज्येष्ठं सहस्रधारमयुताक्षरमच्युतं उ हानं॥ एतास्त उ स्वछभूतय एता वाचो विभूतयः।
ताभिर्म इह धुक्ष्वामृतस्याग्रियं महीं। प्रजापतिरिदं ब्रह्म वेदानां ससृजे रसं। तेनाहं त्रिभ्य मा
प्या संसर्वान्कामां उह्यां महतान्भूमुवः स्वस्त्रयो वेदोसि। ब्रह्म प्रजां मे धुक्ष्व। आयुः प्राणं मे धुक्ष्व।
पशून् त्रियं मे धुक्ष्व। श्रियं यशो मे धुक्ष्व। लोकं ब्रह्मवर्चसमभयं यज्ञसमृद्धिं मे धुक्ष्वेति वाच्यय
त्यध्वर्युमनु ह्यं चेदस्य भवत्यो मुस्वछग्रायजसोमस्येतीज्वा येसंप्रेषितो ये उ य जामाम हइत्या
गूर्य नित्यये वयजति व्यवान्येवानुवषट्करोत्यक्तं वषट्कारानुमंत्रणमाहरत्यध्वर्युरुस्वछ
पात्रमतिग्राह्यांश्च मसांश्च भक्षं प्रतिख्याय होता प्राङ्प्रेरवाद वरो हत्यथैतं प्रेरवं प्रत्यंचम
वव धं चैत्ति येथा वृंसितारं भक्षयिष्यं नेनोपहनिष्यति प्रेरवस्या ह्यायतनं आसीनो होता

३६

भक्षयत्यथैतदुक्थपात्रं होतोपहूतेन जपेन भक्षयति वाग्देवी सोमस्य तृप्यतु सोमो मे राजा
युः प्राणाय वर्धतु । स मे प्राणः सर्वमायुर्दुहां महदित्यष्टौ मा दाभिप्लविकास्तृतीयसवने मन्य
हुब्ध्वं देवां नि विद्धानां दस्य वामस्य पलितस्य होतुरिति सलिलस्य दैर्घतमसं एकचत्वारिंश
तमानो भद्रीयं च तस्य स्थाने ऐकाहिकौ वैश्वदेवस्य प्रतिपदनुचरौ च्यवेत्वैद्यमन्नायज्ञीय
मग्नेत बभ्रवो वय इति षट् स्तोत्रियानुरूपौ यदीळादं भूयसी षु चेत्स्फ्वीरं नाग्निं नस्त्व रक्ष
भिरिति तावतीरनुरूपः संपन्नं महाव्रतं संतिष्ठत इदं महे रग्निष्टोमो यथाकालमवभृथं प्रे
त्यं हरेयुः संदध्युर्वे सोः ॥१३॥ नादीक्षितो महाव्रतं शंसेन्नानेग्नो नापरस्मैना संवत्सर
इत्येके कामं पित्रेवाचार्याय वा शंसेदात्मनो हैवास्य तद्धस्तं भवति होतृ शास्त्रेषूक्थशाय
ज सोमस्येत्येकप्रैषः स नाराशंसे घ नाराशंसे शुवा होत्रकाणामुक्थशायज सोमानां भि
तिलदिदम हर्नानं तेवासिने प्रब्रूयान्नासंवत्सरवासिने नोएवासंवत्सरवासिनेनाब्रल

३६

चारिणेनासब्रह्मचारिणेनोएवासब्रह्मचारिणेनानभिप्राप्तायेतंदेशंनभू
यःसकृदन्नाद्धिर्गदनांचाद्रूप्येवएकएकस्मैप्रब्रूयादितिहस्माहजातूक
र्ण्योनवत्सस्यचनत्तत्नीयइतिनतिष्ठंस्तिष्ठतेनव्रजनव्रजतेनशयानःशया
नायनोपर्यासीनउपर्यासीनायाधएवासीनोधआसीनायनावरुद्धोनप्र
तिस्तब्धोनातिवीतोनांकृत्वोर्ध्वज्ञुरनपश्रितोधीयीतनमांसंभुक्त्वान
लोहितंदृष्ट्वानगतासुन्नात्वाव्रत्यमाक्रम्यनात्क्तोनाभ्यज्यनोन्मर्दनंकारयि
त्वानस्नात्वानवर्णकेनानुलिप्यनस्रजमपिनह्यस्त्रियमुपगम्यनोल्लिख्य
नावल्लिख्यनेदमेकस्मिन्नहनिसमापयेदितिहस्माहजातूकर्ण्यःसमाप
येदितिगालवोयदन्यत्त्राकृत्स्नायाशातिभ्यःसमापयेदेवेत्याग्निवेश्यायनोन्य

मन्यस्मिन्देशे शामयमान इति यत्रेदमधीयीत न तत्रान्यदधीयीत यत्र तत्त्वेनैन्य
दधीयीत कामस्मिं देतत्राधीयीत नेदमनधीयन्नस्मात्कोभवतीति यद्यप्यन्यद्वे
कधीयान्नेवेदमनधीयन्स्मात्कोभवति नास्मादधीतात्प्रमाद्येद्यद्यप्यन्यस्मा
त्प्रमाद्येन्नैवास्मात्प्रमाद्येन्नो एवास्मात्प्रमाद्येदस्माच्चेन्नप्रमाद्येद्दलमात्मन इ
ति विद्याद्दलं सत्यं विद्यान्नेदं विदन्निदं विदसमुद्दिश्नोत्त सह भुंजीत न स
धर्मादाख्याद्यथालः स्वाध्यायधर्मं व्याख्यास्यामः उपपुराणेनापातकेक्षोदके
पूर्वाह्णे न संभिन्नासु छायासु परा० ह्रे नाधीयात् ऊर्ध्वरल्के मेघेपर्यौ विषेत्रिरात्रं वेदि
केनाध्यायेनांतरियान्नास्मिन्कथां वदेत्तनो स्य रात्रौ च नन्यकानियिषेत्तदिति

वाएतस्यमहतोभूतस्यनामभवतियोस्यैतदेवन्नामवेदब्रह्मभवतिब्रह्मभवति॥१४॥
इतिपंचमारण्यकंसमाप्तं॥श्रीविश्वेश्वरार्पणमस्तु॥ ॥संवत् १८२० मार्गशीर्ष
शुद्ध ९ नवमीभौमवासरे॥श्रीकाशीपुरीभागीरथ्यामहातीर्थेतद्दिनेपुस्तकसमाप्तं॥
हस्ताक्षरहरिभजनसखाबालापुरकरेणलिखितं॥शुभंभवतु॥ ॥श्रीरस्तु॥ ॥
काश्यांभानोसंवतिखर्धतिखेशाकेषष्ठ्यांमार्गमासेपराह्ने॥भूकंपोभूच्छ्रावणेशुक्लपक्षेतिथ्या
माद्येमन्मथेसार्पपाते॥भग्नपृष्ठिकटिग्रीवास्तब्धदृष्टिरधोमुखं।कष्टेनलिखितंग्रंथंयत्नेनपरिपालयेत्॥ ॥

३८

३८

॥ ॥इत्युपनिषदः समाप्तः॥ ॥

३८